साहित्य मंथन भारते भातु भारती

Sahitya Manthan

A Peer-Reviewed, Open Access e-journal

ISSN: 2582 6867, Website: http://www.sahityamanthan.in

Year-2, Issue-8, Continuous Issue-14, July-August 2022

# वेदार्थाऽवबोधने निरुक्तस्य कृतकृत्यता

वेदाः जगद्धिताय करूणावरुणालयेन जगदीश्वरेण सृष्ट्यादौ अग्निवायवादित्याङ्गिरसां चतुर्णां तपोमूर्तिनां महर्षिणां माध्यमेन एनामन्तः करणेषु प्रकाशिताः। जगद्गतानां जनानां कैराचरणैः अभ्युदयनिश्रेयसरूप पुरुषार्थसिद्धिः स्यादित्येषा विचारणा विधि निषेधात्मकैः मन्त्रजालैः वेदेषु परमात्मना व्यधायि। ते वेदाः ऋग्यजुस्सामाथर्वनामधेयछन्दोबद्धाः ऋषिदेवतादि संवलिताः ज्ञानकर्मोपसना विज्ञानविषयात्मकाः संहितास्वरूपाः अद्यावधि स्वस्वरूपेण विलसतितमाम्।

परमेष्ठिनः वेदान् समुपलभ्य अग्न्यादयः ब्रह्मादीन् महर्षीन् श्रुतिपरम्परया तान् वेदान् ज्ञापितवन्त इति। ते च ब्रह्मादयः अपराननेकान् श्रुति परम्परयैव पाठितवन्त इति ते वेदाः श्रुति नामधेयाः सञ्जाताः। श्रवणादेव तेषां श्रुतित्वं सन्साध्यते। एवमेव कर्णाकर्णिकया प्रचलिता वेदपाठपरम्परा अद्यावधि चाचलीति। यदा श्रुत्वा धारणे काठिन्यमन्वभवन् शिष्याः तदा तेषामवगमनाय महर्षयः वेदाङ्गानि रचितवन्तः।[1] तेषु वेदाङ्गेषु शिक्षाकल्पोव्याकरणं निरुक्तं छन्दोज्योतिषमिति षड्ग्रन्थाः समाहिताः। 'अङ्गयन्ते ज्ञायन्ते सूच्यन्ते वा वेदार्थाः यैस्तानि अङ्गानि'। इति परिभाषयैव शिक्षादीनां वेदाङ्गमिति सञ्ज्ञा सुलभा। एतेषु वेदाङ्गेषु शिक्षाग्रन्थाः, वेदानामुच्चारणं, कल्पाः, कर्मकाण्डनिरूपणम् व्याकरणं, शब्दस्वरूपनिष्पत्तिः, निरुक्तम् शब्दानामर्थदिशा निर्वचनम्, छन्दः तस्य लयादिनिर्धारणं, ज्योतिषञ्च तस्य कालनिर्धारणं, तत्प्रतिपादितखगोलविद्याञ्च व्यक्तीकर्त्तुं सहाय्यं विधत्ते। एवं षडपिवेदाङ्गानि वेदशरीरं सम्यगभिव्यञ्जयन्ति। एतेषां वेदाङ्गानां तुलना पाणिनीयशिक्षायां शरीराङ्गैः सह सम्यक्कृता वर्त्तते-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।[2]

अत्र निरुक्तनामकं वेदाङ्गं श्रोत्रत्वेन परिकल्पितं वर्त्तते। यथा विना श्रोत्रं किमपि शिक्षितुं न शक्यते तथैव विना निरुक्तं वेदार्थोऽपि ज्ञातुं नैव शक्यते। एतस्मात् निरुक्तवेदाङ्गं वेदपरिज्ञानाय साधकतमं वर्त्तत इति।

अत्राऽयं प्रश्नोदेति यत् किन्तावन्निरुक्तमिति? निर् उपसर्गपूर्वात् 'वचँ परिभाषणे'[3] धातोः 'क्त' प्रत्यये निरुक्त शब्दस्य सिद्धिर्भवति। वचिस्वपियजादीनां किति'[4] पाणिनीयसूत्रेण इति सम्प्रसारणम्। तेनाऽस्य व्युत्पत्तिलभ्योऽर्थोऽस्ति निरुच्यते निःशेषतया परिभाष्यते अर्थो येन तन्निरुक्तमिति केनचित् कविनोक्तम्-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।

अर्थात् यत्र केनचिद्वर्णाऽगमने, वर्णविपर्ययेण, वर्णविकारेण, वर्णनाशेन, धातोः अर्थातिशययोगेन च शब्दार्थः प्रकाश्यते तच्छास्त्रं निरुक्तनामधेयम् इति व्याकरणशास्त्रे यथा शब्दसंस्काराः परिगणिताः तानतिक्रम्य निरुक्तशास्त्रे शब्दसामान्यमक्षरसामान्यं वाऽपि वीक्ष्य शब्दस्यार्थः प्रकटीक्रियते। विशेषतः निरुक्तशास्त्रेण वैदिकपदानामर्थाः प्रकटीक्रियन्ते यान्यपि पदानि लोकवेदयोः प्रसिद्धानि लोक एव वा प्रसिद्धानि व्याकरणसम्मतानि वर्त्तन्ते तेषामर्था निरुक्तेन प्रकाश्यन्ते।

---

[1] "उपदेशायग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषु वेदं च वेदाङ्गानि च" निरूक्त 1/6
[2] पाणिनीय शिक्षा श्लोक सं. 41, 42
[3] धातुपाठः 1/2/56
[4] अष्टाध्यायी 6/1/15

निरुक्तस्य प्रयोजनानि प्रकटीकुर्वन् स्वयमेवाऽऽचार्य यास्कः लिखति यत्-'अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते।'[5] अर्थात् विना निरुक्तं वेदमन्त्रेषु अर्थपरिज्ञानं न भवितुं शक्नोति। विनाऽर्थज्ञानं च स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् योऽर्थज्ञ स इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।[6] इति प्रमाणेन अध्येता स्थाणुरेव भवति केवलं भारं वहति यतोहि सोऽर्थं नैव जानाति। विनाऽर्थज्ञानं पाठे तु 'यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य। एवं हि शास्त्राणि बहून्यधीत्याऽर्थेषु मूढाः खरवद्वहन्ति।।[7] इति प्रमाणेन खरवदेव भवति। स्वयमेव च यास्को वदति यत्-'अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः'।[8] अर्थात् यः पदार्थं न वेत्ति स व्याकरणकृत स्वरसंस्कारानपि नैव कर्त्तुमवगन्तुं च शक्नोति। यतः पदार्थं वीक्ष्यैव शब्देषु प्रकृतिप्रत्ययानां परिकल्पना विधातुं शक्यते। एषाऽस्ति मुख्यतः निरुक्तस्य वेदाऽर्थे कृतकृत्यता। इतोऽपि यास्को लिखति-

'तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्र्यं स्वार्थ साधकं च। '[9]

अर्थात् इदं निरुक्तं विद्यायाः स्थानं वर्त्तते। वेत्ति यथा चराचरं जगत् जीवब्रह्मणी च सा विद्या। विद्यायाः स्थानं= विद्यास्थानं निरुक्तमिति या-या विद्या वेदे लोके च विद्यन्ते सर्वासां विद्यानां मुख्यकेन्द्रं वेदा एव सन्ति। तथाहि स्वामिदयानन्दः आर्यसमाजनियमेषु लिखति 'वेदः सर्व सत्यविद्यानां पुस्तकमस्ति।'[10] 'वेदोऽखिलो धर्ममूलम्'[11] इति ब्रुवन् मनुरपि सिद्धान्तमेनमूरीकरोति। ताः ताः वेदोक्ताः विद्याः निरुक्तविषयैव ज्ञातुं शक्यन्ते इति विद्यास्थानं निरुक्तम्।

अथ चेदं शास्त्रं व्याकरणस्य कात्स्न्र्यमपि वर्त्तते। कृत्स्नस्य भावः कर्म वा कात्स्न्र्यम् व्याकरणं केवलं शब्दस्वरूपमेव व्यनक्ति शब्दस्वरूपः विनाऽर्थं किञ्चितकरमेव बोभवीति। अतः अर्थज्ञानमेव व्याकरणस्य कात्स्न्र्यम्। तच्चार्थज्ञानं निरुक्तदिशैव तस्मात् व्याकरणस्य कात्स्न्र्यमेव निरुक्तम्।

अथापि स्वार्थसाधकमऽपि निरुक्तं स्वस्य अर्थः प्रयोजनं तस्य साधकं निरुक्तशास्त्रम्। निरुक्तमस्य स्वार्थः वेदार्थपरिज्ञानं तस्य साधकमिदं शास्त्रम्। तेन सत्यमेवोच्यते यत् निरुक्तं विनार्थज्ञानं न भवितुं शक्नोति सैषा निरुक्तस्य कृतकृत्यता।

निरुक्तस्य प्रयोजनं वर्णयनाह यास्कः- 'अथापीदमन्तरेण पदविभागो न विद्यते।'[12] अर्थात् निरुक्तशास्त्रेण वेदे पदानां विभागो ज्ञायते। यावच्छब्दस्यार्थः न ज्ञायते तावत् कानि पदानि अत्र वर्त्तन्ते तदपि ज्ञातुं न शक्यते अतः निरुक्तशास्त्रं पदपाठज्ञानेऽपि आवश्यकं वर्त्तते यथा वेदे 'अवसाय' पदमस्ति तत्र अवसशब्दस्य चतुर्थ्यन्तं रूपमथवा 'अव' उपसर्गात् षोऽन्तकर्मणि धातोः ल्यबन्तं रूपम्। एतन्निरुक्तेनेव निश्चेतुं शक्यते यत् 'अवतेः गत्यर्थस्य 'अस' प्रत्ययः अथवा 'अव' उपसर्गात् स्यतेः ल्बन्तं रूपम् उभेऽपि साधु पदे स्तः।

अथाऽपि यज्ञकर्मसु दैवतपदैः अनेके निर्देशाः भवन्ति ते निरुक्तशास्त्रेणेवं निश्चेतुं शक्या भवन्ति। लिङ्गेन देवता परिज्ञानं भवति किन्तु सर्वत्र देवतानां लिङ्गमेव न निर्दिश्यते अनिर्दिष्ट दैवतमन्त्रेषु निरुक्तमेव देवतानिर्धारण समर्थ भवति असतिनिर्वचने देवताविनिश्चयो शक्येव।

सर्वत्र शास्त्रग्रन्थेषु ज्ञानस्य प्रशंसा अज्ञानस्य च निन्दा कृता वर्तते। यश्चाऽर्थान् जानाति स एव वस्तुतो जानाति। यथाह्युक्तम्-

'उतत्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः।।[13]

यः पदानामर्थान् न वेद सः पश्यन्नपि वाचं न ददर्श श्रृणवन्नपि एनां नैवाश्रृणोत् यस्त्वर्थान् जानाति तस्मै स्त्रीरूपा वाक् स्वं तन्वं तथैव व्यक्तीकरोति यथा उशती= कामयमाना स्त्री स्वरूपं स्वपत्ये प्रकटयति। एवं वाक्स्त्री स्वं रूपं स्वस्य ज्ञात्रे प्रकटयति। तस्मादर्थज्ञानाय निरुक्ताऽध्ययनं परमाऽऽवश्यकं वर्त्तते।

---

5 निरुक्तम् 1/6
6 निरुक्तम् 1/6
7 पञ्चतन्त्रम्
8 निरुक्तम् 1/5
9 निरुक्तम् 1/5
10 द्रष्टव्यः आर्यसमाजस्य नियमाः
11 मनुस्मृतिः 2/6
12 निरुक्तम् 1/6
13 पस्पशाह्निकम्, (महाभा.)

अमुना विश्लेषणेन एतत्सुस्पष्टं भवति यत् विना निरुक्तशास्त्रज्ञानं वेदज्ञानं कथमपि न सम्भाव्यते। व्याकरणे केवल शब्दस्य शरीरं निश्चीयते किन्तु निरुक्तेन तस्य भावात्मा प्रकाश्यते। तस्मादेवोक्तम् अर्थ नित्यः परीक्षेत् 'न संस्कारमाद्रियेत विशयवत्यो हि वृत्तयो भवन्ति।'[14] अर्थात् अर्थं नित्यं वीक्ष्य शब्दस्य परीक्षा कार्या व्याकरणदिशा शब्दसाधुत्वज्ञानस्य विशेषाऽऽदरो न विधेयः। यतोऽहि व्याकरणस्य वृत्तयः संशयवत्यो भवन्ति तत्रानेके संशया वर्त्तन्ते। अनेकधा 'बहुलं छन्दसि' इति सूत्रस्य प्रयोगः तस्य विषयत्वं प्रमाणीकरोति। वर्णविपर्ययः वर्णागमः वर्णलोपः एते समेऽपि व्याकरणप्रक्रियायाः कल्पना प्रसूतत्वं विज्ञापयन्ति। तत्र निर्वचनशास्त्रस्य महती आवश्यकता वरीवर्त्ति। वेदाऽर्थस्य त्रिविधप्रक्रिया यास्तस्य याज्ञिकस्वरूपं, दैवतस्वरूपं, अध्यात्मत्वं च वर्णयति तासां प्रयोगः दिग्दर्शनं चाऽपि निरुक्तशास्त्रे एव वर्त्तते। अधियज्ञमधिदैवमध्यात्मं एते त्रिप्रकारक093Eर्था निरुक्तशास्त्रेणेव विज्ञापयितुं शक्यते। अतः वयं कथयितुं शक्नुमः यत् 'वेदाऽर्थावगमने निरुक्तशास्त्रस्य कृतकृत्यता' सुतरां प्रसिद्ध्यति। व्याकरणं निरुक्तमुभेऽपि शास्त्रे वेदाऽर्थ परिज्ञानाय महदुपयुक्तेऽस्तः तयोरऽपि निरुक्तशास्त्रमुभयोरुपादेयतरमिति।

---

गौरव कुमार (शोधार्थी)
श्री लाल बहादुर शास्त्री नेशनल संस्कृत विश्वविद्यालय
नव देहली - 110016

[14] निरुक्तम् 2/1